# 2022

## SANSKRIT — HONOURS

**Paper : CC-13**

**(Indian Ontology and Epistemology)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

सर्वेषां प्रश्नानामुत्तरं **संस्कृतभाषया देवनागरलिप्या** च देयम्।

**Section – A**

**Unit – I & II**

**(Marks : 12)**

**1.** (a) अधोलिखितयोः **कस्यचित् एकस्योत्तरं** देयम्। 12×1

(i) भारतीयदर्शने प्रत्ययवादस्वरूपं यथामति आलोच्यताम्।

(ii) भारतीयदर्शने द्वैतवादस्वरूपं आलोच्यताम्।

***अथवा,***

(b) अधोलिखितेषु **षट्प्रश्नानामुत्तरं** लेखनीयम्। 2×6

(i) भारतीयदर्शनानुसारं दुःखस्य मूलम् किम्?

(ii) 'सर्वदर्शनसंग्रह'-ग्रन्थस्य प्रणेता कोऽस्ति?

(iii) जैनानां 'अधिविद्या' का भवति?

(iv) 'पुद्गलः' को भवति? पुद्गलस्य को विभागो भवति?

(v) न्यायशब्दस्य कोऽर्थः?

(vi) वैशेषिकदर्शने के च पदार्थाः स्वीकृताः?

(vii) सांख्यदर्शने दुःखं कतिविधम्?

(viii) विपर्ययः कः भवति?

(ix) मीमांसा-शब्दस्य कोऽर्थः?

(x) न्यायप्रस्थानं किम्?

Please Turn Over

### Unit – III
**(Marks : 8)**

2. अधोलिखितेषु ***द्वयोः*** टीका लेखनीया। 4×2

(a) कार्यकारणवादः।

(b) सत्कार्यवादः।

(c) आरम्भवादः।

(d) वस्तुवादः।

## Section - B
### Unit – I & IV
**(Marks : 8)**

3. अधोलिखितेषु **कस्यापि *द्वयस्य*** टीका लेखनीया। 4×2

(a) तेजस्।

(b) संयोगः।

(c) प्रयत्नः।

(d) कालः।

### Unit – III
**(Marks : 12)**

4. (a) पृथिव्याः लक्षणं किम्? पृथिव्याः मुख्याः भेदाः के? विस्तरेण आलोच्यन्ताम्। 2+10

***अथवा,***

(b) अन्नम्भट्टानुसारेण मनसः लक्षणमुल्लिख्य तस्य अनुपरिमाणत्वं प्रमाणयतु। 12

## Section - C
### Unit – I & II
**(Marks : 15)**

5. (a) स्मृतेः स्वरूपं किम्? स्मृतिलक्षणे उक्तस्य संस्कारशब्दस्य अर्थः निर्णेयः। स्मृतेः भेदो निरूपणीयः। 3+6+3

***अथवा,***

(b) प्रमा का? सा च कतिविधा? व्यापारस्य लक्षणमुल्लिख्य अनुमितिज्ञाने तस्य उपयोगः वर्ण्यताम्। 3+3+6

6. ***त्रयाणाम्*** रिक्तस्थानपूरणं कर्तव्यम्। 1×3

(a) कार्यनियतपूर्ववृत्ति ______________।

(b) तद्वति तत्प्रकारकः ______________ यथार्थः।

(c) ______________ प्रागभावप्रतियोगि।

(d) मिथ्याज्ञानं ______________।

(e) ______________ हेतुर्गुणो वृद्धिर्ज्ञानम्।।

**Unit – V & VI**

**(Marks : 10)**

7. (a) अधोलिखितेषु ***द्वयोः*** व्याख्या कार्या। 5×2

(i) आप्तवाक्यं शब्दः।

(ii) अर्थाबाधो योग्यता।

(iii) अयथार्थानुभवस्त्रिविधः।

***अथवा,***

(b) अधोलिखितेषु ***पञ्चानां*** प्रश्नानामुत्तरं लेखनीयम्। 2×5

(i) उपमानम् किम्?

(ii) लक्षणा कतिविधा भवति?

(iii) शब्दज्ञानं किम्?

(iv) तर्कः कः भवति? उदाहरणमेकं दीयताम्।

(v) वेगः कुत्र वर्तते?

(vi) संशयस्य लक्षणं किम्? उदाहरणमेकं दीयताम्।